कर्नाटक-गीता-लहरी

पं. ओगेटि परीक्षितशर्मा

शारदा-गौरव-ग्रन्थमाला...क्र. १६

ललित-गीता-लहरी

रचयिता
पं. ओगेटि परीक्षित्शर्मा
उभयभाषाप्रवीणः बी. ए.

प्रस्तावना
म. म. प्रा. दत्तो वामन पोतदार

सर्वाधिकाराः स्वायत्ताः

मूल्यम् ~~[illegible]~~ रूप्य-पंचकम्

प्रकाशकः
पं. ओगेटि परीक्षित शर्मा
आन्ध्र एज्युकेशन सोसायटी हायस्कूल
वडाळा, ७ ए–मार्गः मुम्बापुरी ३१

प्राप्तिस्थलम्–
(१) आन्ध्र एज्युकेशन सोसायटी हायस्कूल
७ ए–मार्गः, वडाळा मुम्बापुरी ३१
(२) शारदा-कार्यालयः पुण्यपत्तनम् २

मुद्रकः
पं. वसन्त अनन्त गाडगीळ
श्रीशारदा-मुद्रणसिद्धि-मन्दिरम्
४२५ सदाशिव-भागः पुण्यपत्तनम् २

FOREWARD

I have great pleasure in publishing my modern Sanskrit Songs in a book form LALITA GEETA LAHARI, to reach a longer circle of readers, lovers and patriots of Sanskrit. These songs are composed in such a manner that they can popularise Sanskrit through light vocal music and dance ballet.

Three lyrical poets of the past (1) Mahakavi Jayadeva (2) Muttu Swami Dikshitar (3) Narayana Tirthulu who enriched Sanskrit literature by their exquisite devotional songs gave me the inspiration to put within this ancient language laythemes in the rhyme and rhythm of modern light and classical music. The songs have already stood their receptivety among the public through the All India Radio of Bombay and the stage of Bombay Andhra Mahasabha.

Through this book of songs I invite a vider public to utilise these songs in their cultural activities and festivals to popularise the Sanskrit language in the country. In this endeavour I have done my best to show that our ancient language can be used for modern style and thought.

It is left for [reader's choice to judge the effort and merit of the poet and how far the modern style could be succeeded.

"To judge of poets is only the faculity of poets" said Ben Jonson.

All these pictures which are printed in the book are drawn by my student Mr. Turaga Sheshachalam who is good in drawing. I wish him success in his life.

Yours faithfully,

OGETI PARIKSHIT



शुभाशीःप्रसादवितरकः

आपरितोषाद् विदुषाम्—

॥ श्रीः ॥

सौर वैशाख २, १८९० — म. म. प्रा. द. वा. पोतदार
वरूथिनी एकादशी — ४९८ शनिवार, पुणें २

मुम्बापुरीनिवासिभिः आन्ध्र-पाठशाला-संस्कृतान्ध्राध्यापकैः पं. ओगेटि परीक्षित महोदयैः विरचिता ललित-गीता-लहरी तैः स्वयं समागत्य श्राविता। अतीव मनोहारिणी तेषां काव्यचातुरी। कण्ठ-गतस्वरमाधुर्यम् अपि चित्ताकर्षकम्। आधुनिकभाषागीतानां सरणिः काव्यैः ध्वनिसादृश्यद्वारा स्मार्यते। अनेन संस्कृतकाव्यश्रवणविषये जनमानसे गानलुब्धत्वात् अर्थबोधराहित्येऽपि विलक्षणम् आकर्षणं समुत्पादयितुं शक्यम्। समाजे संस्कृतविषये प्रेमादर-निर्माणार्थं रुचिर-साधनत्वेन नूतनानुभूति-जनकत्वेन च ललित-गीता-लहरी उपकारिणी स्यात्। तदर्थं धन्यवादान् अर्हन्ति कविवराः। भगवत्पूज्यपादानां चर्पटपञ्जरी-प्रभृति-मधुमधुर-काव्यरत्न-प्रकाशवत् परीक्षित्-गीता-लहरी सहजतया एव रसिकमनोमन्दिरं प्रविशेत् इति बाढम् आशास्महे। आधुनिके काले संस्कृत-जगति इत्थमेव सुरस-ललित-रचनानाम् आवश्यकता। तत्रापि सुबोधताविषयः समाविष्टः चेत् सौवर्णे सौगन्ध्यं स्यात्।

प्रकटतया सार्वजनीन-समारोहेषु नूतनपद्धत्या संस्कृत-कविता-वाङ्मयस्य गानादिकं संयोजितं चेत् सर्वासु दिक्षु आबालवृद्धेषु संस्कृतमाधुर्य-डिण्डिमः सुलभीभवेत्। संस्कृतं लोकप्रियं सार्वजनीनं च कर्तुम् इदम् अमोघं साधनम् इति मन्यामहे। परीक्षित-कविवरैः तत्र अग्रेसरैः भवितव्यम् इति सूचयामः।

२२ एप्रील १९६८ — दत्तो वामन पोतदार

आमुखम्

ललित-गीता-लहरी-नाम्नीं मया रचितां गेय-पुस्तिकां सुरभारती-प्रेमिनां पाठकानां भाषाभिमानिनां कृते प्रकटीकरोमीत्यमन्दानन्दम् अनुभवामि । इमानि गीतानि यथा ललितगानसंगीतद्वारेण शास्त्रीय-नाट्यानुसरण्या च संस्कृतभाषा-प्रचारोपयुक्तानि भवन्ति तथा लिखितानि ।

संस्कृत-गेय-साहित्ये भूतपूर्वाः (१) जयदेवः महाकविः (२) मुत्तुस्वामिदीक्षितः (३) नारायणतीर्थादयः प्रख्यातकविवरा अतीव शब्दार्थालङ्कार-सौष्ठवोपेतानि भक्तिगीतान्यतिसुन्दराणि बहूनि विलिखितवन्तः आसन् । तादृशानि तेषां महाकवीनां गीतानि मे प्राच्य-भाषायां तालल्यान्वितान्यन्त्यप्रासयुक्तानि नवीन-नाट्यानुगुण्य-गीतानि विलिखितुं भावस्फूर्तिम् प्रकल्पितान्यभवन् । एतानि गीतानि मुम्बई-नभोवाणी-केन्द्रात् मुम्बापुरीस्थान्ध्र-महासभारङ्ग-स्थले नाट्यरूपेण श्रोतॄणां प्रेक्षकानां चामोदमभजन्त ।

अस्याः पुस्तिकायाः गीतिकाद्वारेण याचे इयन्तमर्थं भाषाभिमानिनः जनान् तेषां सांस्कृतिक-कार्यक्रमेषु तदितर-विवाहाद्युत्सवेषु देशे संस्कृत-भाषा-प्रचाराय गीतान्येतान्यवश्यमुपयोक्तव्यानीति । अस्मिन् ललित-गीता-लहरी-काव्ये प्राच्य-सुरभारती नवीन-मार्गेणाधुनिकसरण्या व्यवहार-योग्या भवतीति प्रादर्शयम् । तस्मिन्नव्यमार्गे मे यत्नः कियान् सफलोऽभूदिति पाठकाः केवलं विदांकुर्वन्तु ।

'तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः' इति कालिदासमहाकविना प्रोक्तम् ।

अस्मिन् पुस्तके मुद्रितानि चित्राणि सर्वाणि चित्रकला-प्रावीण्येन मम प्राच्यविद्यार्थिना श्री तुरगा शेषाचलमहोदयेन भक्तिपुरस्सरं उक्तानुपदमेव चित्राप्य प्रदत्तानि । तस्मै हार्दिकाशिषपरम्परा वितरामि ।

बुधजनविधेयः

ओगेटि परीक्षित्शर्मा



ललित-गीता-लहरी-लेखकः

ओगेटि परीक्षित्शर्मा

अनुक्रमाणिका

१ वसन्तर्तुः
२ ग्रीष्मर्तुः
३ वर्षर्तुः
४ शरदृतुः
५ हेमन्तर्तुः
६ शिशिरर्तुः
७ सागरयानम्
८ आह्वानम्
९ शिशुलालनम्
१० कर्षकोद्वेगः
११ गौरीलास्यम्
१२ निरीक्षणम्
१३ कैषा
१४ प्रलापिता
१५ हम्पी
१६ भ्रमरगीतम्
१७ आनन्दो ब्रह्मा
१८ त्वमेवाहम् (युगलगीतम्)
१९ आत्मगतम्
२० गीर्वाणी
२१ काश्मीरम्
२२ अमरवाहिनी
२३ कालिदासः
२४ विप्रलब्धा
२५ किलिकिञ्चितम्
२६ अभिसरणम्
२७ प्रथमोदबिन्दवः
२८ शकुन्तला
२९ प्रबोधनम्
३० तृष्णा
३१ ब्रह्मविद्याभास्करगेयम्
३२ हिमालयः

यजुः-चक्रम्

शि
सक
युव
मद
तो
युव
आ
का
धर
वि
ख
ब
आ
क
म
क
शि
रेखा
प्रति
उद

१. वसन्तर्तुः

(वसन्त-रागादितालाभ्यां गीयते ।। ८ मात्रा)

अये संकुल-जीवन-सुखकर-मधुर-हसन्तम्
गाय गाय वसन्त-रागिणि ऋतुराज-वसन्तम् ।।

शशि-पिक-कीर-मयूर-मधुव्रत-निचय-समाकुल-सुषमाकान्तम्
सकलाशावृत-चटुल-समीरण-शीतल-पूत-सुगन्ध-विभान्तम्
युवतीजन-हृदयारविन्द-मधु-बिन्दु-गुञ्जन-चपल-मिलिन्दम्
मदनानल-ज्योतिर्मय-सून-परागातिशयानन्तानन्दम् ।। अये

तोषय नटनावर्तन-शीला-रति-पण्डित-हृदय-वसन्तम्
युवजन-मानस-रञ्जन-भावाकर-सुमचय-प्रबल-लसन्तम्
आलोकय मनसिज-दीपन-कुशल-मनोहर-रसमय-स्वान्तम्
कामाशा-पूरित-नानाविध-गन्धानिल-पूर्ण-वनान्तम् ।। अये

धरणी-युवती-रञ्जन-प्रथम-समागम-संतत-बहु-निरतम्
विकसित-नीरज-राग-पराग-विचर्चित-मधु-परिमल-हसितम्
खगकुल-कोकिल-कूजन-मङ्गल-वाद्य-सुनादावलि-कलितम्
बम्भर-गुञ्जन-शब्दायित-ऋतु-गुण-गण-नामावलि-लसितम् ।। अये

आम्री-मञ्जुल-स्तबकावृत-किसलय-भूषित-सुन्दर-रूपम्
कणकण-रसमय-मधुमय-फलभर-पीवर-तुन्दिल-शोभित-भूपम्
मलयानिल-प्राणानिल-रूपित-जीवन-मधुकर-मधुमासम्
कविकुल-चञ्चल-यौवत-मानस-चोरण-पटुतर-चतुरविलासम् ।। अये

शिथिलित-जीवन-सत्वर-नूतन-चेतन-शिल्पन-कारुवरम्
रेखामात्रा-भासित-विटप-लता-तति-किसलय-दातारम्
प्रतिदिन-सुरत-प्रसक्ताखिल-कामुक-मानस-दोहद-हृदयम्
उदञ्चित-पञ्चम-रागाञ्चित-परभृतिका-जीवन-वितरण-सदयम् ।।

२. ग्रीष्मर्तुः

(दीपकराग-त्रिपुट-तालाभ्यां गीयते ॥ ७ मात्रा)

आलोकय सखि मलयज-रञ्जित-स्तन-भर-लीला
भास्कर-तेजोराजित-ग्रीष्म-नरेन्द्रं नर्तन-शीला ॥

सात्त्विक-राजस-भावोज्ज्वल-मण्डित-पटु-ग्रीष्म-पतिम्
निज-तेजोद्दीपित-धरणी-तल-जीवन-भीम-गतिम्
ऊष्मस्फार-प्रदीपित-सकल-धरातल-शासन-दक्षम्
भीम-गुणालङ्कृत-भास्कर-मणि-सज्जित-पीवर-वक्षम् ॥ आलोकय

अम्बर-मणि-खर-मसृण-किरण-भीषण-तेजो-रूपम्
जलदान्तर-रस-निभ-हृदय-विकाराकृति-सुन्दर-भूपम्
यौवन-मद-भव-पटुतर-घर्म-कणाविल-पटु-दृप्तम्
अहरह-निज-श्वासानिल-सान्द्रातप-बहुविध-तप्तम् ॥ आलोकय

अगणित-ग्रीष्मातप-तापितापाताल-विदारित-हृदया
विलपति व्यपगत-निधिचया वसुमती प्रतिपद-सदया
भ्रमयति लोकं विरस-विचञ्चल-धरणी-मृग-तृष्णा
ग्रीष्मातप-शासन-शिथिलिता विलपति मन्दोष्णा ॥ आलोकय

परिहर मणि-वलयाङ्गद-हारं तरुणी-परिवारम्
परिवेष्टय निर्मोकाकृति-वसनं सखि वारं वारम्
दीपय चटुल-विलोचन-लोकन-रतिपति-रक्तिम-भावम्
वर्षागमन-निदानं तेजोलसितं भीषण-भावम् ॥ आलोकय

आम्रफलावलि-दर्शित-नैजानर्घ-सुवर्ण-विभूतिम्
मारुत-मालावर्त-विचेष्टित-भूः-कण-चञ्चल-भूतिम्
सान्द्रातप-ज्वाला-ज्वालित-पुर-पुरहर-भीकर-मूर्तिम्
सकल-चराचर-तापाकल्पन-विशद-महत्तम-कीर्तिम् ॥ आलोकय

३. वर्षर्तुः

(मेघ (मल्हार) राग-रूपक-तालाभ्यां गीयते ॥)

विरचय नाट्यं प्रमदवति वर्षाधिपतिम्
प्रणम सखि धरणीतल-जीवन-दान-रतिम् ॥

मेघ-ध्वनि-मर्दल-शब्दाञ्चित-वर्षागमनम्
वर्ही-बर्ह-विचित्रित-मञ्जुल-जलधर-वहनम्
रजनी-रमणी-धृत-नीरद-माला-प्रावरणम्
विरह-जनावलि-भावोत्कल्पन-रसमय-काव्यम् ॥ विरचय...

कुरवक-पत्रालूना-रक्ताङ्गुलि-मुद्रा
धन-घनावलि-शीतल-धारा-मधुरार्द्रा
प्रियतम-भुज-संपीडन-व्यपगत-दैहिक-तन्द्रा
शीतानिल-विरहानल-व्यपगत-निद्रा-मुद्रा ॥ विरचय..

धरणीतल-संतति-जीवन-वर-दातारम्
निरीक्षण-क्षेत्रेन्दिर-सेचन-मूलाधारम्
ककचाकृति-केतक-विरहित-हृदय-विदारम्
विरहानल-धूम्राञ्चित-नीरद-कालाकारम् ॥ विरचय...

अभिसारिका-चपला-वल्ली-मार्गण-सदयम्
जलधर-वारण-चपलाङ्कुश-चालन-हृदयम्
झञ्झा-मारुत-भैरव-गायक-राजेन्द्रम्
प्रकृति-मुख-चित्रित-वारिद-कुन्तल-पवनेन्द्रम् ॥ विरचय..

भूतल-युवती-मण्डन-हरिताभरण-लसन्तम्
सरस-पयोधर-पुष्टा-सकल-चराचर-कान्तम्
शीतल-वाःकण-मार्जित-धूलि-चयाशान्तम्
तापात्यय-वारिद-जललव-सून-विराजन्तम् ॥ विरचय..

४. शरदृतुः

(भैरव-रागादि-तालाभ्यां गीयते ॥ ८ मात्रा ॥)

श्वेताम्बर-सज्जित-वेषा प्रणम सखि सात्त्विक-हृदयं राजानम्
निर्मल-देहावृत-धवलाम्बर-भूषित-सुन्दर-शरदृतु-नामानम्

विलसित-तारा-मण्डन-मण्डित-विश्वाकृति-मधुर-लसन्तम्
विकसित-नीरज-गन्धावृत-शीत-समीर-तरङ्ग-विराजन्तम्
सुधाकर-निर्गत-ज्योत्स्ना-घुङ्घुम-कर्पूर-परागाञ्चित-देहम्
मल्ली-काश-सुकाश-मराल-पयोधि-प्रभासित-मेदुर-देहम् ॥ श्वेता०

किरणाकर-मिहिरारुण-चारु-रुचा-प्रावरणाभियुवानम्
विदलित-कैरव-निर्गत-रागविचर्चित-गन्धिल-शारद-राजानम्
मधुव्रत-सारस-हंस-कलस्वन-कीर्तित-वैभव-द्युतिमन्तम्
मधुर-मधुर-सानन्द-गुञ्जित-मधुकर-गीता-निरतम् ॥ श्वेता०

चुलिकीकृत-सागर-जलकण-कुम्भोत्पन्न-मुनीन्द्राकारम्
निर्मल-मधुमय-वाःकण-निकरा-शोभित-सरिता-कासारम्
भेक-क्रीडा-खिल-गर्वापन-मान्त्रिक-गुण-गण-सज्जितहृदयम्
सारस-रसपद-गुम्फित-पूत-चरित्रं-रस-धुनि-पूरित-हृदयम् ॥ श्वेता०

निर्मल-व्योम्नि-प्रदीपित-सप्तर्षि-गुणापूरित-शुद्ध-चरित्रम्
शारद-शोभामय-पदचय-भासुर-मधुभर-सुन्दर-गात्रम्
सानन्दाञ्चित-मोहन-कलस्वर-नादावृत-मेदुर-दर-हासम्
क्षीरोदधि-फेनावृत-वीची-शोभामय-मञ्जुल-श्रीवासम् ॥ श्वेता०

सस्य-श्यामल-क्ष्मातल-व्यापृत-सरस-हिमानी-भूषित-रूपम्
कविकुल-भावाकलित-चतुर्मुख-निर्मित-शारद-तनुरूपम्
अमन्दानन्दोगद्‌त-शङ्करराट्टहास-निभ-मञ्जुल-देहाकृतिनम्
अपश्रुतिश्रवणाकस्मिक-कृत-वाणी-मुखभवहासाकृतिनम् ॥ श्वेता०

५. हेमन्तर्तुः

(नटनारायण-राग–रूपकतालाभ्यां गीयते ॥)

मृगमद-चर्चित-देहा मृगनयने हेमन्तम्
पूजय श्यामल-धरणीतल-पालन-श्रीमन्तम् ॥

हिमानी-वाःकण-मुक्तामणि-मण्डित-वीरम्
कलशाकृति-कलम-पुञ्ज-पिञ्जरित-केदारम्
सन्ध्यारुण-कपिशालङ्कृत-राग-विकारम्
वर्णाञ्चित-परिधानन-भूषित-मधुराकारम् ॥ मृगमद०

नीहारावृत-जडमति-महिमानं हेमन्तम्
गेहे वैश्वानर-दीपन-कारक-श्रीमन्तम्
मकराञ्चित-मासतले वर्णावलि-श्रीकारम्
हरिदास-जनामधुरालापन-मद-संभारम् ॥ मृगमद०

आतप-वारण-नीहाराच्छादन-राजानम्
नीरज-कुल-नाशन-मिहिकामन्त्र-जलावहनम्
जन-दन्तावलि-वीणावादन-शिक्षक-भूतम्
प्राणि-पयःपानाशन-वारित-हेमन्तम् ॥ मृगमद०

विरह-व्यथा-पीडित-राम-प्रिय-ऋतु-हेमन्तम्
अन्योन्यालिङ्गन-समयादान-महान्तम्
गोवत्साम्बारव-नन्दित-हिम-वैभव-राजानम्
प्रेमिक-हृदयाग्नि-प्रदीपन-पावक-महिमानम् ॥ मृगमद०

सरिद्वनिता-सैकत-जघने बहु क्रीडन्तम्
शय्या-गाढालिङ्गन-परवश-जनं त्रायन्तम्
फलभर-सुन्दर-धरणी-प्रावरणाकारम्
कल्याणप्रद-फलमय-रस-धुनि-श्रीकारम् ॥ मृगमद०

६. शिशिरर्तुः

(श्री-रागादि-तालाभ्यां गीयते ॥ ८ मात्रा ॥)

प्रणम सखि शिशिरर्तुं कूर्पासक-पीडित-पीवर-कुचभारा
प्रतिवारं श्वासोत्कम्पित-नीरज-कर्णावृत-कच-भारा

शैत्यातप-मारुत-वीची-माला-भूषित-सुन्दर-शिशिरम्
उत्तम-मद्यास्वादन-घूर्णित-नयनं पटु-दर्पित-शिशिरम्
प्रमदालिङ्गन-संगम-निरतं मधुभर-शिशिर-युवानम्
पादप-वल्ली-पत्राम्बर-शीर्णानग्न-शरीर-शयानम् ॥ प्रणम

सुरभिल-धूपामोदित-कुङ्कुम-रागाञ्चित-मञ्जुल-शिशिरर्तुम्
प्रियजन-विरहित-जन-मानस-तापन-हेतुं पटु-शिशिरर्तुम्
मृगमद-घनसारापूरित-ताम्बूलास्वादन-रत-शिशिरर्तुम्
विरोहित-शालीक्षु-चयावृत-पीवर-क्षितिपति-ऋजु-शिशिरर्तुम्

मधुमय-क्षुर-धारा-निस्तुल-सूची-पीडन-शीतल-रूपम्
शीतल-पवनाकम्पित-सव्रण-बिम्बोपमितोष्ठ-सुरूपम्
मदनानल-दाहित-प्रिय-प्रियतम-सुखकर-शीतल-शिशिरर्तुम्
सत्वर-वृद्धावस्थाकल्पन-पटु-जड-रूपं शिशिरर्तुम् ॥ प्रणम

सहचर-माघ-सुफल्गुन-कृत-दिग्विजयं सुकुमाराकरम्
रमणीयाकृति-धरणीरमणी-प्रिय-शिशिर-कुमारं मारम्
गुण-गण-वर्ग-धरित्री-त्राणन-हेमन्तानुज-ऋजु-शिशिरम्
चरमदशा-शिव-शिव-मन्त्रण-पुण्यतमं-प्रियमदभरशिशिरम् ॥ प्रणम

बहुवन-पादप-सागर-पर्वत-निकटे सन्तत-चारण-निरतम्
पटु-कटु-प्रालेयाम्बु-समाश्रित-शीतल-मारुत-वीची-पूतम्
क्षुर-धारा-घातावृत-तीव्र-व्रणाङ्कित-किंशुक-रागाकारम्
प्राकृत-रमणी-चरमदशा-मण्डन-मण्डल-मधुराकारम् ॥ प्रणम

७. सागर-यानम्

(एकतालेन गीयते)

नायकः ॥ आयाहि रे ! आयाहि रे ! आयाहि रे !

विहायसे सराग-रश्मि-चन्द्रमाः
तनोति सान्द्र-रोचि-मञ्जु-चन्द्रिकाः
सिन्धु-राव-घोषिता-रोदसी-कन्दराः
यान्तु यानपात्रचालकाः सधीवराः ॥ आयाहि रे

अनुयायिनः ॥ याहि रे याहि रे याहि रे याहि ॥

नायकः ॥ चन्द्र-हास-मज्जिता तामसी-प्रिया
सर्व-देह-कान्ति-पुञ्ज-मञ्जु-वल्गुना
निश्चला विभासते तार-लोचना
यान्तु यानपात्रचालकाः सधीवराः ॥

अनुयायिनः ॥ याहि रे याहि रे याहि रे याहि ॥

नायकः ॥ सागरेण चुम्बिता चन्द्रिका मुदा
राजते विलास-हास-लास्य-चित्रिता
रागिणीव भासते राग-रञ्जिता
यान्तु यानपात्रचालकाः सधीवराः ॥

अनुयायिनः ॥ याहिरे याहिरे याहिरे याहि ।

नायकः ॥ निशाकरोज्वलत्करेण कर्षितोर्मिकाः
ऊर्मिकालि-डोलिताः फेन-बालिकाः
बालिकोपमान-फेन-चुबिताञ्चलाः
यान्तु यानपात्रचालकाः सधीवराः ॥

अनुयायिनः ॥ याहि रे याहि रे याहि रे याहि ॥

नायकः ॥ शीत-वात-सिक्त-शुद्ध-रम्य-वालुकाः
कौमुदी-विहार-निर्गताश्चकोरिकाः
मीन-गन्धसंकुला वात-पोतकाः
यान्तु यानपात्रचालकाः सधीवराः ॥

अनुयायिनः ॥ याहि रे याहि रे याहि रे याहि ॥

नायकः ॥ तुषार-वर्ष-सिञ्चित-प्रसून-पल्लवाः
लतान्त-पत्र-निद्रिता बाल-बम्भराः
पुष्प-गन्ध-वाहकाः पश्यतोहराः
यान्तु यानपात्रचालकाः सधीवराः ॥

अनुयायिनः ॥ याहि रे याहि रे याहि रे याहि ॥

नायकः ॥ व्योम-संप्रकाश-काश-धौत-वारिदाः
स्वीय-भावनाच्छ-संस्फुरत्प्रसारिताः
यामिनी-विहार-हारि-मत्त-चेतनाः
यान्तु यानपात्रचालकाः सधीवराः ॥

अनुयायिनः ॥ याहि रे याहि रे याहि रे याहि ॥

नायकः ॥ जीवने स्वजीवितान्त-चारणोत्सुकाः
जलधि-पुष्प-रत्न-राशि-राज-धीवराः
मधुरगान-मत्त-चित्त-मीन-ग्राहकाः
यान्तु यानपात्रचालकाः सधीवराः ॥

अनुयायिनः ॥ याहि रे याहि रे याहि रे याहि ॥

नायकः ॥ सिन्धु-संसार-सर्व-भङ्ग-यात्रिकाः
तुरग-तुङ्ग-लहर-यान-देह-पाटवाः
दिव्य-प्रकृति-मातृ-देवतार्चकाः
यान्तु यानपात्रचालकाः सधीवराः ॥

अनुयायिनः ॥ याहि रे याहि रे याहि रे याहि ॥

नायकः ॥ तन्तु-जाल-जाल-वेत्र-यष्टि-वेल्लिताः
कामिनी-विलास-रास-केलि-लोलुपाः
वीरपान-घूर्णमान-मानसोर्मिकाः
यान्तु यानपात्रचालकाः सधीवराः

अनुयायिनः ॥ याहि रे याहि रे याहि रे याहि ॥

नायकः ॥ आयाहि रे ! आयाहि रे ! आयाहि रे !

८. आह्वानम्

(एकतालेन गीयते)

एहि एहि चन्द्र भोः मा बिभेहि चन्द्र भोः
उदय-शिखर-हिण्डमान चारुचन्द्र भोः ॥
यामिनी-चुम्बनेन रागिचन्द्र भोः ॥ एहि..

तारकालि-केलि-लोल-पाण्डु-चन्द्र भोः
विभावरी-कर्ण-कुण्डलायमान-पूर्ण-चन्द्र भोः
कुमुद-कामिनी-विलास-लोल-मत्त-चन्द्र भोः
गगन-सरसि क्रीडमान राजचन्द्र भोः ॥ एहि...

तावकीन-रश्मि-रूप-रूपका वयम्
मधुर-भाव-हास-ललित-लासिका वयम्
हाव-भाव-मधुर-नटन-शिक्षिता वयम्
चतुर-वृत्त-गान-चरण-पाटवा वयम् ॥ एहि...

सान्ध्य-राग-चित्रिता कपोल-पालिकाः
मधुर-हसन-कुसुम-पुञ्ज-चित्र-भूषिताः
शारदाभ्र-शुभ्र-वसन-चारु-मण्डिताः
भूतले नितान्त-ललित-हसन-जीविताः ॥ एहि...

अनङ्ग-रङ्ग-विविध-चारु-बन्ध-पाटवाः
ईक्षणेन तरुण-हृदय-भाव-ग्राहिकाः
मन्द-यान-चित्त-जात-भाव-चालकाः
भाव-सून-निचय-दान-पुष्प-लाविकाः ॥ एहि...

काम-शास्त्र-भाव-ग्रहण-पारगाः वयम्
मेनकादि-सुन्दरी-स्वरूपका वयम्
विरिञ्चि-भाव-चित्रणे सुन्दरा वयम्
भारतीय-रीति-पूर्ण-मानसा वयम् ॥ एहि...

१. शिशुलालनम्

(एकतालेन गीयते)

पश्य पश्य गगन-यान-बाल-चन्द्र भोः
मा पिधेहि शीत-किरण-नीरदान्तरे ॥ पश्य...

मञ्जु-वक्त्र-स्यन्दमान -फेन-पुञ्ज-शोभिनम्
खेलनेन निर्जितं राजनीति-राजकम्
लोकनेन सर्व-हृदय-भाव-हरण-पाटवम्
पश्य पश्य चन्द्र भो बाल-भाव-चञ्चलम् ॥ पश्य...

आनने नितान्त-चलन-काक-पक्षकम्
पौरुषे धिक्कृतं सकल-राज-वर्गकम्
मन्द-हास-शोभमान-भारतीय-गौरवम्
बाल-भाव-निर्जितं बाल-चन्द्र-कीर्तनम् ॥ पश्य...

डोलिका-मृदुल-पवन-सौख्य-शायिनम्
स्तन्य-पान-सक्त-चित्त-मधुर-क्रन्दनम्
मातृ-हृदय-भाव-शान्ति-मलय-चन्दनम्
गान-मधुर-भाव-मत्त-सुप्त-नन्दनम् ॥ पश्य...

भूमि-भस्म-लसित-देह-शैव-बालकम्
हसित-पुष्प-राग-लिप्त-मृदुल-रम्य-देहिनम्
मातृ-हृदय-गहन-भावनोर्मि-राज-हंसकम्
नयन-कुमुद-सत्त्व-दान-शीत-किरण-भासुरम् ॥ पश्य...

शिव-प्रताप-कृष्णरायपाद-चारिणम्
ईक्षणे नितान्त-दीप्त-भारतीय-दृक्पथम्
आग्रहे कुमार-भाव-दर्शिनं कुमारकम्
पश्य भो भावि-भरत-राज्य-शासकम् ॥ पश्य...

१०. कर्षकोद्वेगः

(एकतालेन गीयते)

ओ !!! ओ !!! ओ !!! ओ !!!
चल रे चल हस रे हस
सर रे सर कट रे कट रे कटारे ॥ ओ...

क्रान्ति-भाव-मार्ग-दर्शने परा वयम्
शान्ति-दीप्त-मानसा मुदाऽनिशम्
दीन-जीव-जीवदा नीरदा भृशम्
पूर्ण-हर्ष-भासुराः कर्षका वयम् ॥ ओ...

घर्म-वारि-निचय-सिञ्चितोर्वरा रे
बीज-वपन-श्याम-सुन्दरी वसुन्धरा रे
शलाटु-पत्र-सून-चित्रिता भूमि रे
राम-राज्य-मार्ग-यान -कर्षका वयं रे ॥ ओ...

सुजल-सुफल-सकल-सस्य-पूर्ण-शालिनी
निखिल-प्राणि-जीवनादान-मेदिनी
अच्छ-मधुर-सलिल-पूर्ण-वेग-वाहिनी
फुल्ल-कुसुम-गन्ध-लिप्त-मन्द-हासिनी ॥ ओ...

तरणि-किरण-तप्त-धरणि-कर्षका वयम्
जलद-वारि-सिक्त-भूमि-स्नातका वयम्
तुषार-परुष-वायु-प्रकृति-लालिता वयम्
निखिल-सस्य-राशि-पूर्ण-हर्षिता वयम् ॥ ओ...

मन्द-चलन-वायु-वीत-श्रामिका रे
अमन्द-वेग-कार्य-करण-यान्त्रिका रे
धरणि-खनन-दीक्षिताः सागरा रे
अचल-भिदन-कुशल-कुलिश-रूपका रे ॥ ओ...

११. गौरी-लास्यम्

(एकतालेन गीयते)

लास्यं स्मर हर-मानस-दास्यम्
कुरुते सुन्दर-नर्तन-शीला
हृदयाह्लादन-सज्जितवेषा
शीतल-नगराज-सुता बाला ॥ लास्यम्...

अतुलित-भावास्पद-लीला
अभिनव-मण्डित-शृङ्गारा
पदवारिज-चलन-नूपुर-
वम्भर-गुञ्जन-झं-झं-झङ्कारा ॥ लास्यम्...

कुवलय-रेखा-वितुलित-रसमय
मोहन-भावोद्दीपन-भुज-मूला
हिमगिरि-तापस-शङ्कर-भावज-
दीपन-विभ्रम-रति-लोला-हेला ॥ लास्यम्...

किंशुक-सुम-निच-निचयाञ्चित-सुषमा
मुखरित-भ्रमरी-कबरी-भारा
सुन्दर-हासेक्षण-लज्जा-विनमित-
पेशल-कम्र-सुमध्यम-कुच-भारा ॥ लास्यम्...

पृथुल-नितम्ब-भरालस-चालन-
मञ्जुल-मृदु-पल्लव-पद-विन्यासा
लास्यानिल-पटु-विचलित-देहा
कर-कङ्कण-निक्विण-दीपित-भासा ॥ लास्यम्...

पेशल-नीलोत्पल-मृदु-नालायित-
प्राञ्चन्मणि-गण-रञ्जित-बाह्वाकारा
दर्पित-गङ्गाधर-दर्पक-खेलन-
पीवर-वर्तुल-कुच-कन्दुक-संभारा ॥ लास्यम्...

कमलासन-मानस-चित्रित-रूपा
पल्लविताशावृत-हृदय-विकारा
वर-मण्डन-मण्डल-मण्डित-वेशा
त्रिपुरान्तक-स्कन्धारोहण-वल्ल्याकारा ॥ लास्यम्...

निटलेक्षण-ज्वाला-दाहित-रति-पति-
जीवन-रूपित-रसमय-लास्याकारा
पुञ्जीकृत-पशुपति-तापस-निस्तुल-
वैदिक-ब्राह्मीमय-पावन-दिव्याकारा ॥ लास्यम्...

लोकत्रय-मूर्तीकृत-निरुपम-सन्ध्या-
रञ्जित-मञ्जुल-लीला-सुषमास्या
प्रावृट्कालाम्बर-प्रथम-स्फोरक-
चपला-वल्ली-चञ्चल-शोभा-लास्या ॥ लास्यम्...

प्रतिपद-निगदित-स्मर-हर-भव-हर-
पुर-हर-शङ्कर-शब्दालङ्कारा
कालिम-वक्रित-कुन्तल-दर्शित-हर-
कामान्ध-तमो-व्यापृत-हृदय-विकारा ॥ लास्यम्...

सन्ध्यारुण-शोभामय-परिधानन-
भूषित-पावक-तरुणी-स्वाहा-रूपा
धूर्जटि-चञ्चल-मानस-निवसन-
शान्ताकृति-वर-राज-मराली-रूपा ॥ लास्यम्...

कर्णालम्बिनि-मल्ली-माला-च्छवि-भासित-
रागाञ्चित-चिक्कण-मृदुल-कपोला
सुरभि-त्र्यम्बक-हिम-नग-देहाकृति-
संकाशित-विकसित-सूनाच्छस्मेरा माला ॥ लास्यम्...

१२. निरीक्षणम्

(एकतालेन गीयते)

पश्यति मित्रं काञ्चनमाला
भूषित-वेषा काचन बाला
प्रियतम-चिन्तन-राग-कपोला
कुन्तल-निर्जित-नीरद-माला ॥ पश्यति...

प्रतिपद-जल्पन-वीणा-तन्त्री
पृथुल-नितम्ब-पराजित-धात्री
कुवलय-मञ्जुल-चञ्चल-नेत्री
चञ्चल-चालन-वैद्युत-गात्री ॥ पश्यति...

ज्योत्स्नालिङ्गन-मधुर-हसन्तम्
चन्द्रं मनुते काल-कृतान्तम्
कुरुते प्रियतम-चिन्तन-सान्तम्
विरहित-बाला तपति नितान्तम् ॥ पश्यति...

पीन-पयोधर-चञ्चल-हारा
निश्चल-लोकन-स्तम्भित-तारा
भावज-रूपित-कृत-सुस्मेरा
मनसिज-पत्नी-निभ-साकारा ॥ पश्यति...

तडिदिव गौरी कुच-भर-भद्रा
सुन्दर-हेलाञ्चित-भावज-मुद्रा
प्रियतम-संगम-समयेऽतन्द्रा
रति-पति-लीला-जनित-सुनिद्रा ॥ पश्यति...

गण्डस्थल-बिम्बित-कर्णाभरणा
प्रियतम-मर्दन-रक्तिम-वर्णा
नीलाम्बर-वेष्टित-सुप्रावरणा
कबरीभर-मञ्जुल-सूनाभरणा ॥ पश्यति...

१३. कैषा ?

(एकतालेन गीयते)

रमते कैषा वर्षातरुणी
वर्षा-सिञ्चित-गात्री श्यामा
मलयाशानिल-ज्वालित-कामा
तडिदिव पीता चञ्चल-रामा ॥ रमते...

उद्धृत-वसनाद् दर्शित-वर्तुल-जङ्घा
वेणी-बन्धन-छलनाद् दर्शित-कक्षा
अधर-स्पन्दन-दर्शित-चुम्बन-शिक्षा
सरसिज-कुड्मल-रूपित-पीवर-वक्षा ॥ रमते...

ग्रीष्मातप-ग्लापित-मानस-रङ्गे
भावज-वल्ली-वलयित-तुङ्गे
केवल-मन्मथ-सहचर-सङ्गे
संतत-चिन्तन-कर्शित-मदङ्गे ॥ रमते...

अम्बर-गलिता चान्द्रमसी शकला
जलधर-गर्जन-विगलित-चपला
रम्भा-नर्तन-स्रस्ता काञ्ची माला
रमते युवजन-भावज-शाला ॥ रमते...

बहुल-व्यापृत-युवकं निद्रासक्तम्
मदनालापन-जल्पन-मत्तम्
नितरां सङ्गम-चिन्तन-रक्तम्
चञ्चल-नूपुर-नादाकर्षसि नक्तम् ॥ रमते...

अम्बुद-बिन्दु-स्यन्दन-मञ्जुल-केशा
प्रियतम-शय्यावर्तन-कामाङ्कुरिताशा
युवजन-कण्ठार्पित-प्रेक्षण-पाशा
त्वरितं सभयं व्रजति तडित्-संकाशा ॥ रमते...

१४. प्रलापिता

(एकतालेन गीयते)

कान्ता का सा का सा का सा कान्ता

जीवन-निर्वाण-दशा स्नेह-लता
विरहानल-तृष्णा-शमन-सुधा
अस्थिर-जीवन-नौका-दीप-शिखा
विरह-पिपासाघ्नी-दिव्य-प्रपा ॥ कान्ता...

कर्णे कथयति रञ्जित-प्रणय-कथाम्
निन्दति देहं संगम हीनं सा साबाधम्
यौवन-जीवन-कोरकितां मार-प्रथाम्
हेवा-विभ्रम-लसितां गाधां सागाधाम् ॥ कान्ता...

व्रीडा-ललित-मनोहर-भाषण-भूषा
व्यथयति मामीक्षण-पाशानिमेषा
संस्कृत-वाणी-पदचय-भूषण-भाषा
मोहित-युवजन-जीवन-पीयूषा ॥ कान्ता...

नाहं जाने हाहा-हूहू-रुत-स्मर-वनिता
सदसत्-संशय-गोचर-कम्र-सुमध्या
हेला-लीलादर-दर-हासाञ्चित-हेवाका
कोऽहं कासौ कथमिह विश्वसनीया ॥ कान्ता...

सुस्मित-वदनाञ्चल-भासित-प्रावरणा
गन्धिल-नूतन-कुसुमित-मल्ली-वल्ली-वर्णा
प्रथम-समागम-गोपित-पिप्पल-पर्णा
मलयज-चर्चित-श्यामल-चूचुक-पूर्णा ॥ कान्ता...

सुम-निभ-पद-चय-कविता-शय्या-लोके
कवि-कुल-गुरु-प्रियतम-स्वेच्छा-चारण-मेघालोके
सुन्दर-सुस्मित-राजित-तारा-पति-चन्द्रालोके
मधुर-सुखमेय-क्षण-सुखस्वप्नालोके ।। कान्ता...

गायति नृत्यति चपला मेघान्तरिता
विलसति हरित-मनोहर-विटपान्तरिता
कलयति रागारुण-संध्यान्तरिता
पीडयतीहावृत-हृदयान्तरिता ।। कान्ता...

निर्झर-वीची-मण्डित-सज्जित-गात्री
केकी-नर्तन-रूपित-नटना-गात्री
नीरद-वर्णाम्बर-सज्जित-वैद्युत-गात्री
ऐरावत-क्षीरोदधि-हिम-गात्री ।। कान्ता...

कलकलाकुल-मधुमय-शुक-वाणी
रस-भर-वर्णावलि-मण्डित-गीर्वाणी
पञ्चम-नादाञ्चित-मधु-पिक-वाणी
स्पृशति च देहं स्वप्ने किसलय-पाणी ।। कान्ता...

घर्म-कणाविल-गन्धायित-तनु-चम्पक-कान्ता
स्मर-सङ्ग-विविध-कला-वन्धन-मृदिता
कण्ठान्तर -निनदन्-मणित-प्रकटित-कुट्टमिता
गाढालिङ्गन -विवशाऽदयं सम्यग्रमिता ।। कान्ता...

१५. हम्पी

(एकतालेन गीयते)

प्राचीनान्ध्रावनि-संस्कारिणी
भारत-जनता-हृदय-स्पन्दिनी
पम्पातीरे शिल्पित-हम्पी
एकाक्षत-स्वप्न-कथेवाभाति ॥ प्राचीना०

विरूपाक्षार्थिक-संभारेण
विद्यारण्याशीर्वाद-बलेन
हरिहर-बुक्कोर्वीपति-यत्नेन
रचिता पूर्वं सा विज्ञानेन ॥ प्राचीना०

प्रस्थर-तक्षित-जीवन-रेखाः
स्मेराङ्कुर-विलसित-शिल्पाकाराः
चतुराननन-मानस-शिल्पित-भावाः
इमे हम्पी-यौवन-लास्याकाराः ॥ प्राचीना०

स रि ग म प द नि स-सप्तस्वर-शालिनी
श्रीकृष्णराय-प्रतिभा-गायिनी
दिग्गज-कवि-मण्डल-कविता-जीविनी
भारत-संस्कृति-चरम-दशा-रूपिणी ॥ प्राचीना०

वीणा-निक्वण-प्रचुरित-संगीता
कविता-वनिता-विरचित-हेवाका
नूपुर-पद-चालन-ध्वानित-सकलाशा
पूर्वं रेजे मञ्जुल-हम्पी लास्याकारा ॥ प्राचीना०

अगणित-वैभव-तन्मय-हम्पी-हृदयम्
अधुना शिथिलित-भीकर-शकलाकारम्
शिल्पं सर्वं जीर्णं भद्रा-नद्याम्
कपिकुल-संकेत-स्थानं दैवायतनम् ॥ प्राचीना०

आसुर-शक्त्या चूर्णित-शिल्पाकाराः
भारत-जन-हृदि मुद्रित-भीमाकाराः
कथयति हम्पी-प्रकृति-रहस्यं विगलित-रूपा
पम्पा भद्रा रक्षित-प्राकृत-प्राकाराकारा ॥ प्राचीना०

१६. भ्रमरगीतम्

(एकतालेन गीयते)

भ्रम भ्रम भ्रम भ्रमर!
भज भज भज नीरज-षण्डम्
पिब पिब पिब मधु-बिन्दुम्
कुसुमात् कुसुमं विटपाद् विटपम् ॥ भ्रम भ्रम भ्रमर!

झुं झुं झुं गुञ्जसि मधुरम्
कुसुमे कुसुमे पिबसि च मकरन्दम्
झुं झुं झुं शब्दं कुर्वन्नाकाशम्
चपलं व्रजसि वेगेनेव विमानम् ॥ भ्रम भ्रम भ्रमर!

प्रति-कुसुमं पीत्वा मकरन्दम्
कुरुषे परिमल-कुसुमाकर-विटपम्
मधु-रस-संभरितं फल-भर-विटपम्
भ्रमर ते हृदयं रसमय-हृदयम् ॥ भ्रम भ्रम भ्रमर!

ते पक्षानिल-निसृत-मञ्जुल-शब्दम्
श्रुत्वा बालाः भय-चकिता नित्यम्
बाला शकुन्तला भीता सोत्कम्पम्
मधुकर गुञ्ज नितरां निर्जन-देशे मधुरम् ॥ भ्रम भ्रम भ्रमर!

जम्बूफल-सादृश्यं ते रूपम्
कुसुम-परागे लुठितं ते देहम्
दृष्ट्वा फल-बुद्ध्या सानन्दम्
आगच्छति ग्रसितुं त्वां कीर-कुलम् ॥ भ्रम भ्रम भ्रमर!

१७. आनन्दो ब्रह्मा

(एकतालेन गीयते)

श्रावण-नीरद-पट-पट-जल-लव-निष्यन्दे
गन्धिल-मारुत-वीची-माला-घ्राणे
कोष्णे मधुराधर-दंशन-सुख-शीत्कारे
सुरतालिङ्गन-सुखमय-भुज-युग-मध्ये ॥ आनन्दो०

वारिद-गर्जन-शम्पा सुन्दर-प्रावृडकाले
भावज-रञ्जित-विरहित-रसमय-चित्ते
अन्योन्या-लोकन -माद्यद्-भावावेशे
मदनानल-दीपन-कल्पित-मधु-सम्पर्के ॥ आनन्दो०

सन्ध्या-समये-सैकत-सागर-तीरे
जलमुच-शीतल-शीकर-तारकिते
प्रियतम-मञ्जुल-मोहन-वदन-सरोजे
परिमल-श्वासानिल-मधुपानायितामोदे ॥ आनन्दो०

हसित-प्रदीपित-चित्तज-प्रेरित-पाणि-ग्रहणे
मन्दानिल-विदलित-वक्रित-कालिम-कुन्तल-वर्गे
सख्युः करतल चित्रण-द्विगुणीकृत-कामावेशे
प्रेक्षण-मनसिज-लज्जा-वल्ली-बन्धन-संसर्गे ॥ आनन्दो०

गङ्गा-जललिपि-डोलायित-नौकायाने
करपुट-गङ्गामृत-विकिरण-मीलित-नयने
विभ्रम-कङ्कण-कर-धूननाभिनय-शिल्पे
स्मेरानन-प्रकटितागणित-मधुमय-रति-काव्ये ॥ आनन्दो०

कलम-मनोहर-वीची-सुन्दर-नयनोत्सव-केदारे
चिक्कण-रूपित-श्यामल-शाद्वल-मृदुमय-भूतल्पे
जीवन-सख्या कर्णे जल्पित-रसभर-पद-पीयूषे
कण्ठाश्लेषे चुम्बन-तनु-परवशाविदित-रस-समये ॥ आनन्दो०

१८. त्वमेवाहम्

(एकतालेन गीयते)

त्वमेवाहं त्वमेवाहं त्वमेवाहर्निशं मे
जीवने रमसे भृशं स्फुरसेऽनिशम् ॥ त्वमेवाहम्...

नायिका ॥ एषा पूर्णिमा रम्या निशा
बालाहं सदा सुतरां सुखे विवशा
त्वद्-दर्शन-विस्मृत-तनु-भावा
आतत-चित्तज-भावावेशा ॥ त्वमेवाहम्...

नायकः ॥ चालन-चञ्चल-गुरुतर-श्रोणी-भारा
व्यावर्तन-शिखरित-पीवर-कुच-भारा
कङ्कण-झण-झण-निक्वण-क्वणिता
पारयसीहाहृदयं परवश-कामावेशा ॥ त्वमेवाहम्...

नायिका ॥ शीतल-मार्दव-सैकत-शय्यायाम्
चन्दन-चर्चित-गन्धिल-देह-लतायाम्
शारद-शुभ्रांशूक-ज्योत्स्नायाम्
क्रीडावावां सुरतालिङ्गन-दोलायाम् ॥ त्वमेवाहम्

नायकः ॥ ते-मधुराधर-दंशन-कृत-भणितम्
तनुते स्वर्ग-सुखं परमानन्दम्
तव सुन्दर-शारद-नीरज-मधु-वदनम्
आह्वयतीव मधुपानाय यौवन-भ्रमरम् ॥ त्वमेवाहम्

नायिका ॥ त्वत्-परिरम्भण-पुलकित-देहा
व्यपगत-लौकिका-बाधा-पाशा
गत-जन्मनि-सञ्चित-पुण्य-बला
त्वत्-सुखमय-गाढालिङ्गन-विवशा ॥ त्वमेवाहम्...

नायकः ॥ मन्मथ-शय्या-विपुलं-श्रोणी-बिम्बम्
लाक्षारञ्जित-शिञ्जा-ध्वनितं पदलास्यम्
कुरुते मे हृदि शाश्वत-मुद्रान्यासम्
कल्पय देवि! परिरम्भण-सुख-समयम् ॥ त्वमेवाहम्...

१९. आत्मगतम्

(एकतालेन गीयते)

नीत्वा हृदय-वसन्तं क्व गता सा हृदय-सुन्दरी
भुक्त्वा यौवन-सर्वस्वं कुटिलालका स्वप्न-सुन्दरी ॥ नीत्वा...

कथितवती साऽविना-भावं कामम्
कृतवती शाश्वतं द्वैधी-भावम्
कथमिह तिमिरे निवसेयम्
विधि-कल्पित-यौवन-शिशिरोऽहम् ॥ नीत्वा...

केकी-कोकिल-शुक-बम्भर-मुखरितोद्याने
पल्लव-स्तबकावृत-सैकत-मृदु-पर्यङ्के
मृणालायित-भुज-कल्पित-सुख-कण्ठाश्लेषे
रभसं त्यक्ता वञ्चन-शीला निबिडे तिमिरे ॥ नीत्वा...

मिहिकावृत-श्यामल-शीतल-शाद्वल-देशे
प्रतिदिनमेवं विरहित-मनसा निर्झरतीरे
कुर्वन् काव्यं शिथिलित-हृदयं पर्वत-शिखरे
विचरामि च यक्षो भूत्वा विपिनैकान्ते ॥ नीत्वा...

दृष्टवा मां विपिने ग्रावा रोदिति निरतम्
सुन्दर-प्रकृतिर्हिमकण-रूपा सततम्
हृदयं भग्नं प्रतिकोणं विलपति नूनम्
अगणित-बाधा-स्वान्तं ग्रसति नितान्तम् ॥ नीत्वा...

सा वञ्चनशीला नहि विश्वसनीया
काव्यायित-हृदयम् अविदित-भावा
सर्वाप्रकृति-निर्दय-रूपा मृगतृष्णा
मे हृदयं रसमयहृदयं बोद्धुं नहि शक्या ॥ नीत्वा...

२०. गीर्वाणी

(एकताले न गीयते)

मे भुवि नृत्यतु निर्मल-कविता-गीर्वाणी
कमलासन-वदन-प्रसारित-परिमल-सरणी ।। मे भुवि

वेद-चतुष्टय-वर्णित-पावन-रमणी
स्फाटिक-निर्मल-विलसित-वीणा-पाणी
निर्जल-वल्लभ-त्रिदिवत्-शासन-पूता-वाणी
नूनं भवति च शाश्वत-भारत-त्राणी ।। मे भुवि

अनन्तोपनिषद्-ब्राह्मण-पूर्णा-सुर-वाणी
मे शीतल -नग-सेतु-विशाले भुवि मञ्जुल-राज्ञी
प्राचेतस-कविवर-कीर्तित-रामायण-चित्रित-वाणी
पाराशर-मुनि-विस्तारित-भारत-गीता-वाणी ।। मे भुवि

पतञ्जलि-पाणिनि-वररुचि-कात्यायन-संस्कृत-वाणी
षडङ्गाकुल-पातञ्जल-योगायुर्वेदावृत-स्ववर्णी
भास्कर-मिहिर-कुलार्चि तागणित-गणिता-वाणी
निगमागम-पदचय-पूरित-पारंपर्येणगता-वाणी ।। मे भुवि

भास-कालिदास-मायूरक-दण्डि-पाद-संपूजित-चरणा
भवभूति-बाण-मुरारि-भारवि-कीर्तित-सुस्थिर-चरिता
भरत-प्रशिक्षित-लीला-हेवा-नाट्याञ्चित-विभ्रम-रूपा
जगन्नाथानन्द-मम्मट-विश्वनाथ-भूषित-रम्यालङ्कारा
लोके भाषा-संवर्धन-मूला पयोधर-रूपा जननी
भारत-गौरव-जीवन-संस्कृति-विद्या-संदायिनी
शङ्कर-रामानुज-मध्वोदित-वेदान्तावृत-जीवन-शालिनी
विलसतु मे देशे च्युत-भारत-वाणी गीर्वाणी ।। मे भुवि

मुनि-जन-पद-गण-जीर्णित-देहा मे वाणी
अस्थिर-रूपास्थिर-भारत-जीवन-संजीविनी
अपगत-गौरव-जीवन-दायिनी-मधु-सुर-वाणी
नूनं भवति च भारत-शासन-त्राणी नान्यात्राणी ।। मे भुवि

२१. काश्मीरम्

(एकतालेन गीयते)

पुलकित-गात्र भारत-पुत्र श्रृणु रे
निर्मल-पावन-चरितं काश्मीरम्
स्मर रे नित्यं शीर्षक-भूतम्
भव्यं-भारत-नन्दन-वन-काश्मीरम् ॥ पुलकित०

कुङ्कुम-चन्दन-कुन्दन-चम्पक-
कुड्मल-मञ्जुल-मन्दारं काश्मीरम्
भारत-योषा-शीर्षक-सिन्दूरम्
विद्या-केद्रं नन्दन-वन-काश्मीरम् ॥ पुलकित०

श्यामल-शाद्वल-कोमल-पल्लव-
भासारञ्जित-वासव-चापं-काश्मीरम्
सुस्वर-पाठन-बहुविध-संकुल-
निर्गत-पावन-वेदालापं काश्मीरम् ॥ पुलकित०

कोकिल-कूजन-केकी-केका-नर्तन-
चञ्चल-बम्भर-झङ्कारं काश्मीरम्
निर्झर-शीतल-शीकर-सिञ्चित-
मल्ली-सून-स्मेरं काश्मीरम् ॥ पुलकित०

शङ्कर-भगवत्पाद-स्पर्शन बहुविध-
शब्दित-भारत-वेदान्तं काश्मीरम्
भारत-संस्कृति-निर्जर-वाणी-
राज्ञी-मकुटं-ब्राह्मी-पीठं काश्मीरम् ॥ पुलकित०

नानाविध-भूपति-पालन-शिक्षित-
सक्रम-वर्तन-गौरव-रूपं काश्मीरम्
हरित-मनोहर-फलमय-सुमचय-
सुन्दर-रमणी-विभ्रम-भावं काश्मीरम् ॥ पुलकित०

बिल्हण-कल्हण-मल्हण-मम्मट-
कविजन-मधुमय-जीवन-शोभित-काश्मीरम्
मधुकर -चुम्बित -बहुविध -गन्धिल -कुसमित-
नीरजवासं श्रीवासं काश्मीरम् ॥ पुलकित०

अम्बर-चुम्बि-हिमाचल-श्रृङ्गक-
सन्ध्या-नर्तन-पशुपति-ताण्डव-घोषण-पूतं काश्मीरम्
निर्जर-मण्डल-भूतल-कल्पित-
ऋतु-गण-चित्रित-सुखमय-देशं काश्मीरम् ॥ पुलकित०

भारत-कविता-केन्द्रीभूतम्
हरित-कदम्ब-कदम्बक-भूमिज-विस्तृत-छायम्
हिम-नग-मण्डन-दर्शन-स्रष्ट्रा-निर्मित-
मणि-मय-दर्शन-तुल्यं काश्मीरम् ॥ पुलकित०

भारत-जनता-मानस-छाया-लोकन-
निर्मल-रूपं सादर्शं काश्मीरम्
शतविध-बर्बर-माया-परिवृत-
पीडितमात्मानं श्रीनगरं काश्मीरम् ॥ पुलकित०

रङ्गोत्तुङ्गतरङ्गित-निर्झर-फेनिल-
पुञ्जीभूत-हसितं काश्मीरम्
वृन्दारक-मण्डल-खेलन-
विभ्रम-भारत-भूतल-स्वर्गं काश्मीरम् ॥ पुलकित०

२२. अमरवाहिनी

(एकतालेन गीयते)

जयत जयत जननी-रक्षण-दीक्षित-भारत-योधाः
शात्रव-भूमिज-भञ्जन-प्रलय-प्रभञ्जन-भारत-वीराः
पर-नग-हृदय-विदारण-भीषण-कुलिशाकृति-योधाः
कुरुत कुरुत देशं स्वर्ग-समानं भारत-जननी-पुत्राः ॥ जयत

अरि-जन-दहन-विरूपाक्षेक्षण-कुहर-धनञ्जय-रूपाः
समराङ्गण-पावक-तापन-द्विगुणीकृत-वर्ण-सुवर्णाकाराः
पुष्करावर्तक-घन-गर्जन-निस्स्वन-प्रतिरव-विभीषिकाः
प्रलय-सन्ध्या-निटलेक्षण-ताण्डव-पद-घट्टन-शब्द-समीराः ॥ जयत

आशुग-वैरि-सदाशन-वासुकि-पन्नग-भीषण-फूत्काराकाराः
परजन-पन्नग-खण्डन-काञ्चन-पक्षोल्लसितोद्धत-गारुत्मत-रूपाः
महिषासुर-मर्दिनि-भयद-कपर्दिनि-करतल-खर-करवालाकाराः
रण-भुवि शत्रु ध्वंसन-याम्य-भयङ्कर-निर्दय-किङ्कर-तुल्याः॥ जयत

ग्रीष्माम्बर-मणि-तेजो-निभ-शतमुख-व्यापृत-प्रतिभा-भासुर-धाराः
क्रमशिक्षण-शिक्षित-साञ्द्रोज्वल-विनयाक्रमित-विक्रम-भावाः
मदमातङ्गाकृति-प्रबल-शतघ्नी-दल-विदलन-सैहिक-तेजो-रूपाः
तारक-खण्डन-पण्डित-षण्मुख-सेनावितुलित-भारत-धीराः ॥ जयत

हरहर-भं-भं-घोषण-जननी-रञ्जन-शात्रव-भञ्जन-निरताः
स्मर-हर-पुर-हर-शङ्कर-करतल-राजित-भव्य-पिनाकाकाराः
परिपन्थि-सुमस्तक-कन्दुक-रुधिरार्णव-खेलन-चञ्चल-विक्रान्ताः
आसेतु-हिमाचल-धरणीतल-भावोद्वेगोद्वेल्लित-कल्लोलाकाराः ॥

आवृद्ध-स्तनपावृत-जननी-सीमान्तर-निटल-तटोद्रेखा-रचन-धुरीणाः
परजन-जलनिधि-प्रमथन-निस्तुल-पटुतर-मन्थर-भूधरशक्त्योपमिताः
सप्तार्णव-प्रोद्वेल्लित-शेष-फणावलि-निस्तुल-भयद-तरङ्गाकाराः
आहव-सवनार्पित-समिदाकृति-तनुपावन-शाश्वत-स्वर्गीयाः॥ जयत

२३. कालिदासः

(एकतालेन गीयते)

सकल-भुवन-तल-निखिल-कवि-जन-नुत-कालिदास-महाकवे !
जय नितरां जयतेतरां-कवि-कुल-तिलकायमान-भारत-कवे !

गुरु-गल-शङ्ख-विनिर्गत-सुस्वर-नादो
वाणी-पद-युग-मञ्जुल-नूपुर-कल-कल-नादो
ब्राह्मी-पेशल-कर-रुह-प्रणित-कच्छपी-नादो
बहुधा-मिलित-स्सुषुवे रसमय-गीती-संतानम् ॥ सकल०

ते सन्देश-परम्परा-ध्वनितं नीरद-माला नव्यम्
गौरी-शङ्कर-भावज-खेलन-जनितं ते कुमार-सम्भव-काव्यम्
रघुकुल-वर्णन-पूतं तव गीर्वाणी-वीणातानम्
ते मधु-मय-नूतन-वृत्ताकुलितं गीर्वाणी-मोहन-सन्तानम् ॥ सकल०

रसमय-कविता-लालिता-बाला-विलसित-कुन्तला-शकुन्तला
हेवा-चित्रित-लास्यैः पटुतर-शिक्षण-प्रौढा-मालविका
विक्रम-साहस-दर्शन-विवशोर्वशी सुर-बाला
मङ्गल-निर्झर-शीकार-स्नपिता ऋतुमती सा बाला ॥ सकल०

मधु-मय-पद-गुम्भन-पूतं भारत-वर्षम्
तव-वाणी-शैलूषी-लास्याञ्चित-मञ्जुल-हर्षम्
प्रथयति ते कीर्तिं सा ब्राह्मी सोत्कर्षम्
वर्षति ते प्रतिभा-तोयं देशे प्रति-वर्षम् ॥ सकल०

काली-दत्त-वर-प्रसादित-दिव्यालापावृत-पावन-विभो
विक्रम-नव-कविकुल-मण्डल-मण्डन-प्रतिभा-प्रभो
कविता-वनिता-धरणी-तल-मकुट-हीन-राजन्
सिप्रा-जल-मज्जन-व्यापगत-कश्मल-भासुर-देहिन् ॥ सकल०

२४. विप्रलब्धा

(एकतालेन गीयते)

आयाता मधुर-मधु-यामिनी
मुग्ध-वधू-जन-जीवन-दायिनी
मलयानिल-चञ्चल-गामिनी
मधुमय-जीवित-वसन्त-यामिनी ॥ आयाता...

चिरयति मे जीवन-वसन्त-दाता
अभिनव-यौवन-मद-संभरिता
रसमय-प्रियतम-पद-संगीता
वल्लभ-प्रति-कृति-दर्शन-रमिता ॥ आयाता...

दिवा-निशं ते विभावानुभावाः
परिपीडयन्ति स्मर-सायक-रूपाः
कथमिह यौवन-तृष्णा खलु शमिता
हा हतविधिना निरतं व्यपगत-सुरता ॥ आयाता...

निन्दति स्वान्तं रञ्जित-सन्ध्या-रागम्
शतधा मञ्जुल गन्धिल-कुसुम-परागम्
मधुरं-गायति-प्रियतम-मोहन-रागम्
प्रथयति लोके प्रेम-लतानुरागम् ॥ आयाता...

परभृत-विरुतं कुरुते हृदयम्
पति-विरहित-जनमनुराग-मयम्
कर्षति चापं मुञ्चति शर-निचयम्
अबला-जन-हृदय मदय-मदनोज्यम् ॥ आयाता...

२५. किलिकिञ्चितम्

(एकताले गीयते)

सखि ! क्व यामि किं करोमि किं भणामि वञ्चिताहम्
वद हृदयमदयं मे दहति विरहानलेनानिशम्
नायाति कथित-समयोऽपि मन्दानिल-सुख-मय-संकेतम्
अलीक-वचन-निचय-वञ्चिता कुसुम-सुकमार-बालाहम् ॥ सखि

स्पृशति काल-व्याल-गरल-मिलित-मलयानिलो
न जाने कथं भवति मे जीवितानिलो
किं गता त्वं सखि तदीय-निकेतनम्
कथय यामि विफला याम्य-निकेतनम् ॥ सखि

वृथा भवति मे तरुण-रम्य-सुखकार-यौवनम्
मधुर-भाव-हाव-हेला-भूषित-सुन्दर-जीवनम्
भवति मे पटुतर-शृङ्गार-भाव-किलिकिञ्चितम्
गहन-चन्द्रिका-निभं मे मधुर-स्वप्नायितम् ॥ सखि

निर्घृण किं वञ्चयसि मामबलां कलावतीम्
न विलोकयसि मदन-भाव-मधुर-रागिणीम्
तारकाञ्चित-चारु-भावास्पद-विभावरीम्
स्मर्यसे न रोमाञ्चित-राग-भाग्य-श्रिया शोभिनीम् ॥ सखि

अहो रहसि किं वा कर्णे मधु-मय-वचसा कथितम्
आगच्छेयं तव सङ्गम-निरतोऽहं सखि मां भणितम्
किं खलु वञ्चन-शीलोऽयं नो चेत् सङ्गम-शीलोऽयम्
भण मे प्रिय-सखि निर्मल-मनसा कमुपायम् ॥ सखि



शान्दिक्ग - विहारः

२६. अभिसरणम्

(एकतालेन गीयते)

चन्द्रिका सुहासिनी चचार यौवने
कोकिलाङ्गना चुकूज सादरं वने
चन्द्रमाश्चिरं मुदा जहास पुष्करे
साम्प्रतं प्रयाति चारु यौवतं नु रे ॥ चन्द्रिका...

चन्द्र-चन्द्रिका-समागमो बभूव रे
कुसुम-राजि-वल्लरी मुदा ललास रे
सदागतिः प्रसून-सौरभम् उवाह रे
कन्यका राग-रञ्जिता वभासि रे ॥ चन्द्रिका...

इन्दु-शकल-सून-दाम-मण्डिताश्च रे
तुहिन-फेन-धवल-चीर-वेषिताश्च रे
गमन-कम्प-स्वेद-सिक्त-बाहु-मूलका रे
मुदाङ्गनाभिसारिका बभूवु रे ॥ चन्द्रिका...

इन्दु-रश्मि-रूप-भाज-कामिनी-वनम्
विशति सौध-गेह-शयन-मन्दिरम्
कर्षतीव तरुण हृदय-भाव-सन्ततिम्
किं नु रे? पश्य रे? युवति-चेष्टितम् ॥ चन्द्रिका...

मदन-भाव-मत्त-चित्र-गर्वितास्सदा
पीवर-स्तन-स्फटिक-हार-सज्जिता मुदा
पृथुल-सरस-जघन-मन्द-मन्द-चारणाः
अलस-गमन-युवक-हृदय-कुसुम-मार्गणाः ॥ चन्द्रिका...

२७. प्रथमोदबिन्दवः

(एकतालेन गीयते)

अम्बराङ्गणे चलन्ति नील-वारिदाः
भानु-किरण-तप्यमान-प्राणि-शान्तिदाः ॥ अम्बराङ्गणे...

अन्धकार-बन्धुरस्ते बलाहकाः
मातृ-भूमि-फाल-भाग-वक्रितालकाः
शत्रु-शस्त्र-दाहनेन धूम-मालिकाः
प्रकृति-पठन-वरुण-देव-वर्ण-मालिकाः ॥ अम्बराङ्गणे...

वारिदाम्बु-पान-मत्त-चित्त-चातकाः
भान्ति मानसौक-राज-हंसकाः
अस्त्र-संन्यासनेन-राज-पुत्रकाः
भवन्ति राजमान -लम्बोदराः ॥ अम्बराङ्गणे...

नीरदाप-पातनेन भूतलं मुदा
दिव्य-वारि-वाहनेन वत्सलं सदा
पल्वलेषु रटचमान-दर्दुरार्भकाः
वर्षदेव-स्तोत्रमान-मन्त्र-पाठकाः ॥ अम्बराङ्गणे...

हर्ष-जात-नाटयमान-बर्हि-जालकाः
हृदय-देव-वीक्षणेन-मुग्ध-बालिकाः
शीतलाम्बु-षेचनेन घास-पल्लवाः
चुम्बनोत्सेद्यमान-भाव-पल्लवाः ॥ अम्बराङ्गणे...

पर्वताग्र-प्रथम-वारि-पातने प्रवाहकाः
वर्षभीति-धावमान-नाग-बालिकाः
बिन्दु-पात-ध्वन्यमान-वारि-जालकम्
अम्बुपान-मेदिनी-विलास-जालकम् ॥ अम्बराङ्गणे...

२८. शकुन्तला

(एकताले गीयते)

याति शकुन्तला लसत्कुन्तला
कोमला मातुला बाला व्याकुला ॥ याति...

विक्लव-भावावृत-काश्यप-पुष्टा
प्रति-पद-विरहित-सखी-जन-पृष्टा
मार्गण-परिहर-हरिणा-कृष्टा
पति-गृहमेवं व्रजेत खलु सन्तुष्टा ॥ याति...

कोकिल-कूजन-सम्मत-गमना
मन्दानिल-रूपित-स्वागत-सुमना
लता-कुञ्ज-निकुञ्जोद्गत-गन्धिल-सूना
आमोदावृत-राग-पराग-विवर्धित-मदना ॥ याति...

विटप-लता-दानाधृत-चीरा-भरणा
ज्योत्स्ना-धवलित-मञ्जुल-प्रावरणा
हरिण-पतङ्गाखिल-रावित उद्यानावरणा
किसलय-मण्डन-मण्डल-सज्जितालङ्करणा ॥ याति...

कर-रुह-मार्जित-कज्जल-जल-नयना
कण्ठ-स्तम्भित-दुःखाकुल-विमना
जनकालिङ्गन-द्विगुणित-भय-चलना
सखी-जन-मधुमय-पद-संलपना ॥ याति...

प्राकृत-रमणी विलपति सावाधं मौना
निश्चल-रूपा विरहित-भावा चित्र-समाना
बाला शकुन्तला राज-मराली मञ्जुल-याना
विलपति याति न याति च कम्पित-पदयाना ॥ याति...

२९. प्रबोधनम्

(एकतालेन गीयते)

पश्य बाल सुप्रभा-नवोदयम्
सकल-प्राणि-सौख्यदं शुभोदयम्
लास्यमान-कामिनीव रागोदयम्
जगति वन्द्य-चित्र-भानु-भानूदयम् ॥ पश्य...

अरुण-भानु-मञ्जु-रश्मि-चित्रमण्डलम्
प्राग्दिशाङ्गना-वदन-मण्डलम्
राग-किरण-बोधितं विहग-मण्डलम्
चित्र-रश्मि-चित्रितं भूमि-मण्डलम् ॥ पश्य...

चेतनाचेतनं कार्य-करण-व्यापृतम्
भूप-राग-चोदितो लोक एव साम्प्रतम्
मलय-वायु-वीचिका-प्रपूरितम्
प्रकृति-जन्तु-जाल-नव्य-प्राण-राजितम् ॥ पश्य...

प्रातरेव मित्र-देव-भव्य-लोकनम्
वीत-जाड्य-दिव्य-ज्ञान-दायकम्
सर्वदा विधेहि चित्र-भानु-वन्दनम्
तिमिर-पाप-निचय-प्रचुर-क्षालकम् ॥ पश्य..

आयुरारोग्य-भक्ति-ज्ञान-किरण-मालिनम्
ज्योतिषां पतिममुं लोक-शक्ति-दायिनम्
पवन-जीवनादान-भावुकं दिवापतिम्
प्रणम वीर्य-शक्ति-कान्ति-दायकम् ॥ पश्य...

३०. तृष्णा

(एकतालेन गीयते)

पठ रे मनमोहन तरुणी-काव्य-प्रपञ्चम्
अनुभव-नित्यं रति-पति-भाव-निकुञ्जम् ।। पठ रे

मन्मथ-भावातप-सान्द्र-वितानम्
धरणी-तल-विचकित-मरीची-जालम्
दर्शं दर्शं मे कामुक-राग-मयं चपलम्
धावति सारङ्गायित-हृदयं तृष्णाकुलितम् ।। पठ रे

नहि नहि शाम्यति यौवन-तृष्णा
कियदपि चुम्बन-कण्ठाश्लेष-विलग्ना
बाह्यं न विजानाति सा सुरते मग्ना
कियदपि भुक्तं जनयति नूतन-भावं तृष्णा ।। पठ रे

किमिदं चित्रं किमिदं हृदयम्
केवल-युवती-सङ्गम-चतुरम्
तरुणी-हृदयाम्बर-विहरित-चन्द्रमसम्
जरा-स्वर्भानुर्ग्रसति कदा वा सम्पूर्णम् ।। पठ रे

पिब रे मन रमणी-मधुराधर-सारम्
भज रे मन यौवत-लास्याञ्चित-रूपम्
स्मरे रे मन परमानन्दाब्धि-भूतं मणितम्
जप रे मन सुख-केन्द्री-भूतं यौवत-निचयम् ।। पठ रे

एषा स्मर-सङ्गर-भौतिक-भावना
अलौकिक-मार्गण-नान्दी-स्मरणा
तरुणी-स्तन-भर-पीवर-सुषमा-कामी
नूनं भवति च चरमे मोक्ष-दशा-गामी ।। पठ रे

३१. ब्रह्म-विद्या-भास्करगेयम्

(एकतालेन गीयते)

हे राष्ट्रपुरुष ब्रह्म तेजआर्ष-भाव पूर्ण-चित्त
भारतीय-ज्ञान-मार्ग पूत-चरित-पुण्य-शील ।। स्वागतम्

वेद-मार्ग-नित्य-भाव प्राच्य-पश्चिमावबुद्ध
धन्य जीव विश्व-वश्य राष्ट्र-पीठ-भ्राजमान ।। स्वागतम्

जलधि-रूप-वेद-शास्त्र शुद्ध-तत्व-ज्ञान-रूप
सकल-जीव-हृदय-पद्म जीव-दान-ज्योति-रूप ।। स्वागतम्

आत्म-ज्ञान-ध्वस्त-तिमिर दिव्य-ज्ञान-वश्य-देश
ग्रीष्मतप्त-कृष्ण-मेघतत्त्व-जलधि-कर्ण-धार ।। स्वागतम्

चन्द्र-हास-विशद-हास शीत-शैल-धौत-मकुट
शारदाभ्र-शुभ्र-वसन पुंस्त्व-वेष-शारदा ।। स्वागतम्

अस्मदीय-भाव-निचय
केन्द्र-रूप-गहन-हृदय
हृदय-गगन-दिव्य-हंस
भारतीय-तत्त्व-बोध ।। स्वागतम्

पश्चिमावनी-तलस्थ-
प्राणि-सन्घ-तत्त्व-ज्ञान
प्राच्य-देश-ज्ञान-किरण
किरण-दिव्य-भास्कर ।। स्वागतम्

त्रितय-जलधि-कीर्त्यमान
शीतलाद्रि-दृश्यमान
विबुध-वर्ग-स्तुत्यमान
निगम-शाखि-कोकिल ।। स्वागतम्

मौनि-संघ-बोध्यमान
तत्व-ज्ञान-पूत-चित्त
प्रौढ-भाव-सरस-हृदय
भारतीय-भाग्य-भूषण ।। स्वागतम्

सेतु-शीतलाद्रि-मध्य
इन्द्र-भोग-भुञ्जमान
कर्म-ज्ञान-सक्त-चित्त
राष्ट्र-मानसौक-राजहंस ।। स्वागतम्

३२. हिमालयः

भारत-देशे उत्तर-सीम्नि उल्लसते हिमवान्
भूतल-पर्वत-श्रेणिषु सोऽयं पर्वत-राज-महान्

गङ्गा-यमुना-मानस-सज्जित-वैभव-श्रीमान्
तापस-मुनि-गण-सुर-गण-निवसन-भगवान्
शङ्कर-गौरी-ताण्डव-लास्यानन्दित-श्रीमान्
गिरिजाकृत-तापस-द्रावित-शीतल-शैलमहान् ॥ भारत

फालेक्षण-निर्गत-भीकर-ज्वाला-दाहित-मन्मथ-हिमवान्
गौरी-शङ्कर-परिणय-कल्पित-पृथुल-शिलातल-महिमान्
सकलागम-घोषण-शब्द-ध्वानित-कन्दर-रूपितवान्
प्राकृत-भारत-धरणी-रक्षण-देवाकल्पित-शीतल-हिमवान् ॥

नन्दा-देवी-काञ्चन-गङ्गा-कैलासाञ्चित-महिमान्
स्रष्ट्रा-निर्मित-भूतल-पर्वत-सुन्दर-राजितवान्
मानव-जीवन-आदर्शायित-जीवन-हिमवान्
विलसति देशे कामं शीतल-गिरि-राज-महान् ॥ भारत

सततं भूमौ वर्षातप-पीडित-हिमवान्
कथयति लोकं कर्मज्ञानं महिमान्
नूनं लोके सोऽयं लोके पर्वत-राज-महान्
निरतं भारत-चेतसि लसते सोऽयं भगवान् ॥ भारत

वञ्चन-शीला अन्यदेशिका प्रयतन्ते नितराम्
ऋषिगण-पूतं भारत-मकुटं ग्राहयितुं सुतराम्
उत्तिष्ठ रे भारत सोदर स्मर रे तं पर्वत-राजानम्
रक्षय मित्रैरर्पय धन-सन्ततिमात्मानम् ॥ भारत

शा र दा–गौ र व – ग्र न्थ मा ला

पुष्पम्	लेखकः	मूल्यम्
१. श्रीराजेन्द्रप्रसादचरितम्	पं. वासुदेवशास्त्री लाटकर	३.००
२. वात्सल्यरसायनम्	प्रा. श्री. भा. वर्णेकर	१.००
३. शिक्षेषा सात्त्विकी सताम्	प्रा. रं. रा. देशपाण्डे	२.००
४. श्रीरामकृष्णपरमहंसीयम्	प्रा. श्री. भा. वर्णेकर	१.२५
५. बालकानां जवाहरः	पं. विघ्नहरि देव	०.४०
६. श्रीमान् विन्स्टनः चर्चिलः	पं. औदुम्बरकर शास्त्री	०.६४
७. अप्पाशास्त्रीः साहित्यसमीक्षा	प्रा. अशोक अकलूजकर	२.००
८. श्रीशिवराज्योदयम् खण्डः १	डॉ. श्री. भा. वर्णेकर	८.००
९. 'समानमस्तु वो मनः'	डॉ. ग. बा. पळसुले	३.००
१०. मराठी–संस्कृत-शब्दकोषः	जोशी-परांजपे-गाडगीळ	(क्रमशः)
११. भूपो भिषक्त्वं गतः ।	पं. ग. पां. लोण्ढेशास्त्री	१.००
१२. विनायक-वीर-गाथा	डॉ. ग. बा. पळसुले	३.००
१३. आङ्ग्ललघुकाव्यानुवादमाला	पं. ल. ज. खरे	२.००
१४. श्रीराजयोगभाष्यम्	डॉ. चि. त्र्यं. केळकर	५.००
१५. मुक्तक-मञ्जूषा	दि. द. बहुलीकर	२.००
१६. ललित-गीता-लहरी	पं. ओगेटि परीक्षित्शर्मा	१.५०

प त्र व्य व हा र स्था न म्

'शारदा' – कार्यालयः पुष्पपत्तनम् २